विधाकोलाहलक्षपितकालामरी कुशलकीलाल-पोषणनभाः” ॥) रक्तम्। इत्यमरः ३। ३। १९९॥ (और्व्वाग्नेः कीलं आलाति। आला+कः।) अमृतम्। मधु। इति शब्दरत्नावली॥ (पुं कीलाय बन्धाय अलति पर्य्याप्नोतीति। पशुः॥)

कीलालधिः, पुं, (कीलालं जलं धीयतेऽस्मिन्। धा+किः।) समुद्रः। इति शब्दरत्नावली॥

कीलालपः, पुं, (कीलालं रुधिरं पिबति। पा+“आतोऽनुपसर्गे कः”। ३। २। ३। इति कः।) राक्षसः। इति शब्दरत्नावली॥

कीलितः त्रि, (कील्यतेऽसौ॥ कील+कर्म्मणि क्तः।) बद्धः। इत्यमरः। ३। १। ४२॥ (यथा, राजेन्द्र-कर्णपूरे ३०।

“किं वान्यत्तव देव! वेल्लति यदि भ्रूवल्लरीपल्लवः
सोऽपि क्षामकपोलकीलितकरः संक्रन्दनः क्रन्दति”॥)

कीशः, पुं, (की इति शब्दं ईष्टे। ईश्+कः। यद्वा कस्य वायोरपत्यं अत इञ्। किः हनुमान् ईशो यस्य।) वानरः। इत्यमरः २। ५॥ ३॥ (यथा, काशीखण्डे ४२। ३१।

“रासभैः करभैः कीशैः श्येनैरश्वतरैर्वकैः”॥

के आकाशे ईष्टे प्रभवतीति। क+ईश्+कः।) सूर्य्यः। पक्षी। इति शब्दरत्नावली॥ नग्ने त्रि। इति मेदिनी॥

कीशपर्णः, पुं, (कीशः वानरः तस्य लोमेव पर्ण-मस्य।) अपामार्गः। इति शब्दरत्नावली॥

कीशपर्णी, स्त्री, (कीशपर्ण+जातौ ङीष्।) अपा-मार्गः। इत्यमरः। २। ४। ८९॥

कु ङ शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ङ कवते इति दुर्गादासः॥

कु ल शब्दे। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सेट्।) ल कौति। इति दुर्गादासः॥

कु शि ङ आर्त्तस्वरे। इति कविकल्पद्रुमः॥ (तुदां-आत्मं-अकं-सेट्।) शि ङ कुवते अकुत। इति दुर्गादासः॥

कु, व्य, (कु+डुः।) पापम्। कुत्सा। ईषदर्थः। निवारणम्। इति मेदिनी॥

कुः, स्त्री, (कु+मितादित्वात् डुः।) पृथिवी। इत्य-मरः। २। १। ७॥

कुक्, ङ आदाने। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्।) ङ कोकते। इति दुर्गादासः॥

कुकभं, क्ली, (कुकेन आदानेन पानेनेत्यर्थः भातीति। भा+कः।) मद्यम्। इति शब्दचन्द्रिका॥

कुकरः, त्रिं, (कुत्सितः करोः यस्य।) कुत्सितहस्त-युक्तः रोगादिना कुञ्चितकरः। तत्पर्य्यायः। कुणिः २। इत्यमरः। २। ६। ४८॥ कूणिः ३ कोणिः ४। इति तट्टीका॥

कुकीलः, पुं, (कुः पृथिवी तस्याः कील इव।) पर्व्वतः। इति त्रिकाण्डशेषः॥

कुकुटः, पुं, (कु ईषत् कुत्सितं यथा स्यात् तथा वा कुटतीति। कुट्+कः।) सितावरः। इति राज-निर्घण्टः॥ सुषणि शाक इति भाषा॥ (अस्य पर्य्याया यथा भावप्रकाशस्य पूर्व्वखण्डे १ भागे।

“शितिवार शितिवरः स्वस्तिकः सुनिषण्णकः।
श्रीवारकः सूचिपत्रः पर्णकः कुकुटः शिखी”॥
गुणाश्चास्य सुनिषण्णकशब्दे ज्ञेयाः॥)

कुकुदः, पुं, (कुकु इत्यव्ययं अलङ्कृता कन्या। तां सत्-कृत्य पात्राय ददाति यः।) कूकुदः। सत्कारपूर्व्व-कालङ्कृतकन्यादानकर्त्ता। इत्यमरटीकायां राय-मुकुटः॥

कुकुन्दरं, क्ली. (स्कुन्द्यते कामिनाऽत्र। स्कुदि आप्र-वने मद्गुरादयश्चेति निपातनात् साधुः।) नितम्ब-स्थकूपकद्वयम्। पृष्ठवंशादधोगर्त्तद्वयम्। इत्यमरः। २। ६। ७९॥ कुकुन्दरे इति द्विवचनान्तोऽपि प्रयोगः॥ (यथा सुश्रुते शारीरस्थाने। ६ अ॥

“पार्श्वजघनवहिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च”॥)

कुकुन्दरः, पुं, (कुं भूमिं दरयति दारयति वा अन्त-र्भूतण्यन्तात् दृ अण् निपातनात् वृद्ध्यभावेन साधुः। कु ईषत् कुत्सितं वा कुन्दरमत्र।) कुक्कुरद्रुः। कुकुरौंदा इति हिन्दी भाषा। तत्-पर्य्यायगुणाः। यथा भावप्रकाशे॥

“कुकुन्दरस्ताम्रचूड़ः सूक्ष्मपत्रो मृदुच्छदः।
कुकुन्दरः कटुस्तिक्तो ज्वररक्तकफापहः॥
तन्मूलमार्द्रं निःक्षिप्तं वदने मुखशोषहृत्”॥

(पुंलिङ्गोऽयं शब्दोऽपि नितम्बस्थकूपकद्वये वर्त्तते यथा॥

“पृष्ठवंशं ह्युभयतो यौ सन्धी कटिपार्श्वयोः।
जघनस्य वहिर्भागे मर्म्मणी तौ कुकुन्दरौ”॥

इति वाभटे शारीरस्थाने। ४ अध्याये॥)

कुकुभा, स्त्री, (कु ईषत् कुः पृथ्व्यधिष्ठात्री देवता इव भा यस्याः।) रागिणीविशेषः। इति हलायुधः॥

कुकुरः, पुं, (कु कुत्सितं कुरति शब्दायते। कुर्+अच्।) कुक्कुरः। (कुं पृथिवीं कुरति स्वामित्वेन आदत्तवान्। कुर्+कः। यद्वा—कुकधातोः “मद्गुरादयश्च”। उणां १। ४२। इति साधुः।) क्षत्रियविशेषः। इत्युणादिकोषः। स तु यदुवंशी-यान्धकराजपुत्रः। इति श्रीभागवतम्॥ (यथा माघे १३। १९।

“परिफुल्लगण्डफलकाः परस्परम्
परिरेभिरे कुकुरकौरवस्त्रियः”॥)

ग्रन्थिपर्णीवृक्षः। इति त्रिकाण्डशेषः॥

कुकुराः, पुं, (कुकुराः स्वनामख्याताः क्षत्रियाः तेषां जनपदः।) देशविशेषः। तद्देशस्थलोकश्च। तत्-पर्य्यायः। यदवः २ दशार्हाः ३ सात्वताः ४। बहुवचनान्तोऽयं शब्दः। इति त्रिकाण्डशेषः॥

कुकूटी, पुं, (कोः पृथिव्याः कूटोऽस्त्यस्याः। अच् गौरादित्वात् ङीष्।) शाल्मलिवृक्षः। इति राज-निर्घण्टः॥ (शाल्मलिशब्देऽस्य विवरणं ज्ञेयम्॥)

कुकूलं, क्ली, (कोः भूमेः कूलं। कुत्सितं कूलं वा।) शङ्कुभिः सङ्कीर्णं श्वभ्रम्। इत्यमरः। ३। ३। २०२। तनुत्रम्। इति हारावली॥

कुकूलः, पुं, (कु+ऊलच् कुगागमश्च।) तुषानलः। इत्यमरः। ३। ३। २०२॥

(“शिरीषादपि मृद्वङ्गी केयमायतलोचना
अयं क्व च कुकूलाग्निकर्कशो मदनानिलः”। इति उद्भटः। केचित्तु “कुकूलाग्निः कर्कशो मदनानलः” इत्येवमाहुः॥)

कुकोलं, क्ली, (कुत्सितं कोलति। कुल+अच्।) कोलिवृक्षः। इति शब्दचन्द्रिका॥

कुक्कुटः, पुं स्त्री, (कुक्+सम्पदादित्वात् क्विप्। कुका आदानेन कुटतीति। कुट+कः।) पक्षि-विशेषः। कुकुड़ा इति भाषा। तत्पर्य्यायः। कृकवाकुः २ ताम्रचूड़ः ३ चरणायुधः ४। इत्य-मरः। २। ५। १७॥ कालज्ञः ५ नियोद्धा ६ विष्किरः ७ नखरायुधः ८ ताम्रशिखी ९। इति जटाधरः॥ रात्रिवेदः १० उषाकरः ११ वृताक्षः १२ काहलः १३। इति शब्दरत्नावली॥ दक्षः १४ यामनादी १५ शिखण्डिकः १६। तन्मांस-गुणाः। (यथा, भावप्रकाशे।

“कुक्कुटो वृंहणः स्निग्धो वीर्य्योष्णोऽनिलहृद्गुरुः।
चक्षुष्यः शुक्रकफकृद्बल्यो रूक्षः कषायकः॥
आरण्यकुक्कुटः स्निग्धो वृंहणः श्लेष्मलो गुरुः।
वातपित्तक्षयवमिविषमज्वरनाशनः”॥

अरण्यकुक्कुटमांसगुणाः। हृद्यत्वम्। श्लेष्म-हरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ रूक्ष-त्वम्। कषायत्वम्। स्वादुत्वम्। शीतलत्वञ्च। इवि राजवल्लभः॥ ग्राम्यकुक्कुटमांसगुणाः। स्नि-ग्धत्वम्। वातहरत्वम्। दीपनत्वम्॥ गुरुत्वञ्च। इति राजनिर्घण्टः॥ बलकारित्वम्। उष्णत्वम्। मधुरत्वञ्च। इति राजवल्लवः॥ * ॥ निषादपुत्त्रः। शूद्रपुत्त्रः। तृणोल्का। कुक्कुभपक्षी। इति मे-दिनी॥ वह्निकणः। इति हेमचन्द्रः॥ (आसन-विशेषः। यथा हठयोगदीपिकायाम्। १। २३।

“पद्मासनन्तु संस्थाप्य जानूर्वोरन्तरे करौ।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम्”॥)

कुक्कुटकः पुं, (कुक्कुट+संज्ञायां कन्।) कुक्कुभपक्षी। इति शब्दरत्नावली॥ स्वार्थे कन् प्रत्यये कुक्कुट-शब्दार्थोऽप्यत्र॥)

कुक्कुटव्रतं, क्ली, (कुक्कुट इत्याख्यं व्रतम्।) सन्तानार्थं स्त्रीकर्त्तव्यव्रतम्। इति शब्दमाला॥ कुक्कुटीव्रत-मपि पाठः। ललितासप्तमीव्रतमिदम्। यथा,—

“भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम्॥
पूजयेच्च तदा तस्या दुष्प्रापं नैव विद्यते”॥

इति तिथ्यादितत्त्वे भविष्यपुराणम्॥

कुक्कुटमण्डपः, पुं, मुक्तिमण्डपः। यथा, काशीखण्डे।

“ततो लोकास्तदारभ्य कथयिष्यन्ति सर्व्वतः।
मुक्तिमण्डपनामैतदेष कुक्कुटमण्डपः”॥

कुक्कुटमस्तकं, क्ली, (कुक्कुटस्येव मस्तकं शिखा यस्य।) चव्यम्। इति राजनिर्घण्टः। चैँइ इति भाषा॥ (चव्यशब्देऽस्य गुणादयो बोद्धव्याः॥)

कुक्कुटशिखः, पुं, (कुक्कुटस्य शिखेव शिखा यस्य।) कुसुम्भवृक्षः। इति शब्दचन्द्रिका॥

कुक्कुटाभः, पुं, (कुक्कुट इव आभाति। आ+भा+कः।) कुक्कुटतुल्यवर्णचरणसर्पविशेषः। तत्पर्य्यायः।